# মেধাদক্ষিণামূর্তি সহস্রনামস্তোত্র এবং নামাবলী

শ্রীঃ

অস্য শ্রী মেধাদক্ষিণামূর্তিসহস্রনামস্তোত্রস্য

ব্রহ্মা ঋষিঃ । গাযত্রী ছন্দঃ । দক্ষিণামূর্তির্দেবতাআ ।

ওং বীজম্ । স্বাহা শক্তিঃ । নমঃ কীলকম্ ।

মেধাদক্ষিণামূর্তিপ্রসাদসিদ্ধ্যর্থে জপে বিনিযোগঃ ।

হ্রাম্ ইত্যাদিনা অঙ্গ ন্যাসঃ ।

ধ্যানম্ ।

সিদ্ধিতোযনিধের্মধ্যে রত্নগ্রীবে মনোরমে ।

কদম্ববনিকামধ্যে শ্রীমদ্বটতরোরধঃ ॥ ১॥

আসীনমাদ্যং পুরুষমাদিমধ্যান্তবর্জিতম্ ।

শুদ্ধস্ফটিকগোক্ষীরশরৎপূর্ণেন্দুশেখরম্ ॥ ২॥

দক্ষিণে চাক্ষমালাং চ বহ্নিং বৈ বামহস্তকে ।

জটামণ্ডলসংলগ্নশীতাম্শুকরমণ্ডিতম্ ॥ ৩॥

নাগহারধরং চারুকঙ্কণৈঃ কটিসূত্রকৈঃ ।

বিরাজমানবৃষভং ব্যাঘ্রচর্মাম্বরাবৃতম্ ॥ ৪॥

চিন্তামণিমহাবৃন্দৈঃ কল্পকৈঃ কামধেনুভিঃ ।

চতুষ্ষষ্টিকলাবিদ্যামূর্তিভিঃ শ্রুতিমস্তকৈঃ ॥ ৫॥

রত্নসিংহাসনে সাধুদ্বীপিচর্মসমাযুতম্ ।

তত্রাষ্টদলপদ্মস্য কর্ণিকায়াং সুশোভনে ॥ ৬॥

বীরাসনে সমাসীনং লম্বদক্ষপদাংবুজম্ ।

জ্ঞানমুদ্রাং পুস্তকং চ বরাভীতিধরং হরম্ ॥ ৭॥

পাদমূলসমাক্রান্তমহাপস্মারবৈভবম্ ।

রুদ্রাক্ষমালাভরণভূষিতং ভূতিভাসুরম্ ॥ ৮॥

গজচর্মোত্তরীযং চ মন্দস্মিতমুখাম্বুজম্ ।

সিদ্ধবৃন্দৈর্যোগিবৃন্দৈর্মুনিবৃন্দৈর্নিষেবিতম্ ॥ ৯॥

আরাধ্যমানবৃষভং অগ্নীন্দুরবিলোচনম্ ।

পূরযন্তং কৃপাদৃষ্ট্যা পুমর্থানাশ্রিতে জনে ॥ ১০॥

এবং বিভাবযেদীশং সর্ববিদ্যাকলানিধিম্ ॥ ১১॥

লং ইত্যাদিনা পঞ্চোপচারাঃ ॥

দেবদেবো মহাদেবো দেবানামপি দেশিকঃ ।

দক্ষিণামূর্তিরীশানো দযাপূরিতদিঙ্মুখঃ ॥ ১॥

কৈলাসশিখরোত্তুঙ্গ-কমনীযনিজাকৃতিঃ ।
বটদ্রুমতটীদিব্যকনকাসনসংস্থিতঃ ॥ ২॥

কটীতটপটীভূতকরিচর্মোজ্জ্বলাকৃতিঃ ।
পাটীরাপাণ্ডুরাকারপরিপূর্ণসুধাধিপঃ ।৩॥
জপাকোটীরঘটিতসুধাকরসুধাপ্লুতঃ ।
পশ্যল্ললাটসুভগসুন্দরভ্রূবিলাসবান্ ॥ ৪॥

কটাক্ষসরণীনির্যৎকরুণাপূর্ণলোচনঃ ।
কর্ণালোলতটিদ্বর্ণকুণ্ডলোজ্জ্বলগণ্ডভূঃ ॥ ৫॥

তিলপ্রসূনসংকাশনাসিকাপুটভাসুরঃ ।
মন্দস্মিতস্পুরন্মুগ্ধমহনীযমুখাম্বুজঃ ॥ ৬॥

কুন্দকুড্মলসংস্পর্ধিদন্তপঙ্ক্তিবিরাজিতঃ ।
সিন্দূরারুণসুস্নিগ্ধকোমলাধরপল্লবঃ ॥ ৭॥

শঙ্খাটোপগলদ্দিব্যগল়বৈভবমঞ্জুলঃ ।
করকন্দলিতজ্ঞানমুদ্রারুদ্রাক্ষমালিকঃ ॥ ৮॥

অন্যহস্ততলন্যস্তবীণাপুস্তোল্লসদ্বপুঃ ।
বিশালরুচিরোরস্কবলিমৎপল্লবোদরঃ ॥ ৯॥

বৃহৎকটিনিতংবাঢ্যঃ পীবরোরুদ্বযান্বিতঃ ।
জঙ্ঘাবিজিততূণীরস্তুঙ্গগুল্ফযুগোজ্জ্বলঃ ॥ ১০॥

মৃদুপাটলপাদাব্জশ্চন্দ্রাভনখদীধিতিঃ ।
অপসব্যোরুবিন্যস্তসব্যপাদসরোরুহঃ ॥ ১১॥

ঘোরাপস্মারনিক্ষিপ্তধীরদক্ষপদাম্বুজঃ ।
সনকাদিমুনিধ্যেযঃ সর্বাভরণভূষিতঃ ॥ ১২॥

দিব্যচন্দনলিপ্তাঙ্গশ্চারুহাসপরিষ্কৃতঃ ।
কর্পূরধবলাকারঃ কন্দর্পশতসুন্দরঃ ॥ ১৩॥

কাত্যাযনীপ্রেমনিধিঃ করুণারসবারিধিঃ ।
কামিতার্থপ্রদঃশ্রীমৎকমলাবল্লভপ্রিযঃ ॥ ১৪॥

কটাক্ষিতাত্মবিজ্ঞানঃ কৈবল্যানন্দকন্দলঃ ।
মন্দহাসসমানেন্দুঃ ছিন্নাজ্ঞানতমস্ততিঃ ॥ ১৫॥

সংসারানলসংতপ্তজনতামৃতসাগরঃ ।
গংভীরহৃদযাম্ভোজনভোমণিনিভাকৃতিঃ ॥ ১৬॥

নিশাকরকরাকারবশীকৃতজগত্ত্রযঃ ।

তাপসারাধ্যপাদাব্জস্তরুণানন্দবিগ্রহঃ ॥ ১৭॥

ভূতিভূষিতসর্বাঙ্গো ভূতাধিপতিরীশ্বরঃ ।
বদনেন্দুস্মিতজ্যোৎস্নানিলীনত্রিপুরাকৃতিঃ ॥ ১৮॥

তাপত্রযতমোভানুঃ পাপারণ্যদবানলঃ ।
সংসারসাগরোদ্ধর্তা হংসাগ্র্যোপাস্যবিগ্রহঃ ॥ ১৯॥

ললাটহুতভুগ্দগ্ধমনোভবশুভাকৃতিঃ ।
তুচ্ছীকৃতজগজ্জালস্তুষারকরশীতলঃ ॥ ২০॥

অস্তংগতসমস্তেচ্ছো নিস্তুলানন্দমন্থরঃ ।
ধীরোদাত্তগুণাধার উদারবরবৈভবঃ ॥ ২১॥

অপারকরুণামূর্তিরজ্ঞানধ্বান্তভাস্করঃ ।
ভক্তমানসহংসাগ্র্যভবামযভিষক্তমঃ ॥ ২২॥

যোগীন্দ্রপূজ্যপাদাব্জো যোগপট্টোল্লসৎকটিঃ ।
শুদ্ধস্ফটিকসংকাশো বদ্ধপন্নগভূষণঃ ॥ ২৩॥

নানামুনিসমাকীর্ণো নাসাগ্রন্যস্তলোচনঃ ।
বেদমূর্ধৈকসংবেদ্যো নাদধ্যানপরাযণঃ ॥ ২৪॥

ধরাধরেন্দুরানন্দসন্দোহরসসাগরঃ ।
দ্বৈতবৃন্দবিমোহান্ধ্যপরাকৃতদৃগদ্ভুতঃ ॥ ২৫॥

প্রত্যগাত্মা পরংজ্যোতিঃ পুরাণঃ পরমেশ্বরঃ ।
প্রপঞ্চোপশমঃ প্রাজ্ঞঃ পুণ্যকীর্তিঃ পুরাতনঃ ॥ ২৬॥

সর্বাধিষ্ঠানসন্মাত্রস্স্বাত্মবন্ধহরো হরঃ ।
সর্বপ্রেমনিজাহাসঃ সর্বানুগ্রহকৃত্ শিবঃ ॥ ২৭॥

সর্বেন্দ্রিযগুণাভাসঃ সর্বভূতগুণাশ্রযঃ ।
সচ্চিদানন্দপূর্ণাত্মা স্বে মহিম্নি প্রতিষ্ঠিতঃ ॥ ২৮॥

সর্বভূতান্তরস্সাক্ষী সর্বজ্ঞস্সর্বকামদঃ ।
সনকাদিমহাযোগিসমারাধিতপাদুকঃ ॥ ২৯॥

আদিদেবো দযাসিন্ধুঃ শিক্ষিতাসুরবিগ্রহঃ ।
যক্ষকিন্নরগন্ধর্বস্তূযমানাত্মবৈভবঃ ॥ ৩০॥

ব্রহ্মাদিদেববিনুতো যোগমাযানিযোজকঃ ।
শিবযোগী শিবানন্দঃ শিবভক্তসমুদ্ধরঃ ॥ ৩১॥

বেদান্তসারসন্দোহঃ সর্বসত্ত্বাবলম্বনঃ ।

বটমূলাশ্রয়ো বাগ্মী মান্যো মলযজপ্রিযঃ ॥ ৩২॥

সুশীলো বাঞ্ছিতার্থজ্ঞঃ প্রসন্নবদনেক্ষণঃ ॥

নৃত্তগীতকলাভিজ্ঞঃ কর্মবিত্ কর্মমোচকঃ ॥ ৩৩॥

কর্মসাক্ষী কর্মমযঃ কর্মণাং চ ফলপ্রদঃ ।

জ্ঞানদাতা সদাচারঃ সর্বোপদ্রবমোচকঃ ॥ ৩৪॥

অনাথনাথো ভগবানাশ্রিতামরপাদপঃ ।

বরপ্রদঃ প্রকাশাত্মা সর্বভূতহিতে রতঃ ॥ ৩৫॥

ব্যাঘ্রচর্মাসনাসীন আদিকর্তা মহেশ্বরঃ ।

সুবিক্রমঃ সর্বগতো বিশিষ্টজনবৎসলঃ ॥ ৩৬॥

চিন্তাশোকপ্রশমনো জগদানন্দকারকঃ ।

রশ্মিমান্ ভুবনেশশ্চ দেবাসুরসুপূজিতঃ ॥ ৩৭॥

মৃত্যুঞ্জযো ব্যোমকেশঃ ষটিত্রংশত্তত্ত্বসঙ্গ্রহঃ ।

অজ্ঞাতসম্ভবো ভিক্ষুরদ্বিতীযো দিগম্বরঃ ॥ ৩৮॥

সমস্তদেবতামূর্তিঃ সোমসূর্যাগ্নিলোচনঃ ।

সর্বসাম্রাজ্যনিপুণো ধর্মমার্গপ্রবর্তকঃ ॥ ৩৯॥

বিশ্বাধিকঃ পশুপতিঃ পশুপাশবিমোচকঃ ।
অষ্টমূর্তির্দীপ্তমূর্তিঃ নামোচ্চারণমুক্তিদঃ ॥ ৪০॥

সহস্রাদিত্যসঙ্কাশঃ সদাষোডশবার্ষিকঃ ।
দিব্যকেলীসমাযুক্তো দিব্যমাল্যাম্বরাবৃতঃ ॥ ৪১॥

অনর্ঘরত্নসংপূর্ণো মল্লিকাকুসুমপ্রিযঃ ।
তপ্তচামীকরাকারো জিতদাবানলাকৃতিঃ ॥ ৪২॥

নিরঞ্জনো নির্বিকারো নিজাবাসো নিরাকৃতিঃ ।
জগদ্গুরুর্জগৎকর্তা জগদীশো জগৎপতিঃ ॥ ৪৩॥

কামহন্তা কামমূর্তিঃ কল্যাণবৃষবাহনঃ ।
গঙ্গাধরো মহাদেবো দীনবন্ধবিমোচকঃ ॥ ৪৪॥

ধূর্জটিঃ খণ্ডপরশুঃ সদ্গুণো গিরিজাসখঃ ।
অব্যযো ভূতসেনেশঃ পাপঘ্নঃ পুণ্যদাযকঃ ॥ ৪৫॥

উপদেষ্টা দৃঢপ্রজ্ঞো রুদ্রো রোগবিনাশনঃ ।
নিত্যানন্দো নিরাধারো হরো দেবশিখামণিঃ ॥ ৪৬॥

প্রণতার্তিহরঃ সোমঃ সান্দ্রানন্দো মহামতিঃ ।

আশ্চর্যবৈভবো দেবঃ সংসারার্ণবতারকঃ ॥ ৪৭॥

যজ্ঞেশো রাজরাজেশো ভস্মরুদ্রাক্ষলাঞ্ছনঃ ।
অনন্তস্তারকঃ স্থাণুঃ সর্ববিদ্যেশ্বরো হরিঃ ॥ ৪৮॥

বিশ্বরূপো বিরূপাক্ষঃ প্রভুঃ পরিবৃডো দৃঢঃ ।
ভব্যো জিতারিষড্বর্গো মহোদারো বিষাশনঃ ॥ ৪৯॥

সুকীর্তিরাদিপুরুষো জরামরণবর্জিতঃ ।
প্রমাণভূতো দুর্জ্ঞেযঃ পুণ্যঃ পরপুরঞ্জযঃ ॥ ৫০॥

গুণাকারো গুণশ্রেষ্ঠঃ সচ্চিদানন্দবিগ্রহঃ ।
সুখদঃ কারণং কর্তা ভববন্ধবিমোচকঃ ॥ ৫১॥

অনির্বিণ্ণো গুণগ্রাহী নিষ্কলঙ্কঃ কলঙ্কহা ।
পুরুষঃ শাশ্বতো যোগী ব্যক্তাব্যক্তঃ সনাতনঃ ॥ ৫২॥

চরাচরাত্মা সূক্ষ্মাত্মা বিশ্বকর্মা তমোঽপহৃত্ ।
ভুজঙ্গভূষণো ভর্গস্তরুণঃ করুণালযঃ ॥ ৫৩॥

অণিমাদিগুণোপেতো লোকবশ্যবিধাযকঃ ।
যোগপট্টধরো মুক্তো মুক্তানাং পরমা গতিঃ ॥ ৫৪॥

গুরুরূপধরঃ শ্রীমৎপরমানন্দসাগরঃ ।
সহস্রবাহুঃ সর্বেশঃ সহস্রাবযবান্বিতঃ ॥ ৫৫॥

সহস্রমূর্ধা সর্বাত্মা সহস্রাক্ষঃ সহস্রপাত্ ।
নিরাভাসঃ সূক্ষ্মতনুর্হৃদি জ্ঞাতঃ পরাৎপরঃ ॥ ৫৬॥

সর্বাত্মগঃ সর্বসাক্ষী নিঃসঙ্গো নিরুপদ্রবঃ ।
নিষ্কলঃ সকলাধ্যক্ষশ্চিন্ময়স্তমসঃ পরঃ ॥ ৫৭॥

জ্ঞানবৈরাগ্যসংপন্নো যোগানন্দময়ঃ শিবঃ ।
শাশ্বতৈশ্বর্যসম্পূর্ণো মহাযোগীশ্বরেশ্বরঃ ॥ ৫৮॥

সহস্রশক্তিসংযুক্তঃ পুণ্যকাযো দুরাসদঃ ।
তারকব্রহ্মসংপূর্ণস্তপস্বিজনসংবৃতঃ ॥ ৫৯॥

বিধীন্দ্রামরসংপূজ্যো জ্যোতিষাং জ্যোতিরুত্তমঃ ।
নিরক্ষরো নিরালম্বঃ স্বাত্মারামো বিকর্তনঃ ॥ ৬০॥

নিরবদ্যো নিরাতঙ্কো ভীমো ভীমপরাক্রমঃ ।
বীরভদ্রঃ পুরারাতির্জলন্ধরশিরোহরঃ ॥ ৬১॥

অন্ধকাসুরসংহর্তা ভগনেত্রভিদদ্ভুতঃ ।

বিশ্বগ্রাসোঽধর্মশত্রুর্ব্রহ্মজ্ঞানৈকমন্থরঃ ॥ ৬২॥

অগ্রেসরস্তীর্থভূতঃ সিতভস্মাবকুণ্ঠনঃ ।

অকুণ্ঠমেধাঃ শ্রীকণ্ঠো বৈকুণ্ঠপরমপ্রিয়ঃ ॥ ৬৩॥

ললাটোজ্জ্বলনেত্রাক্তস্তুষারকরশেখরঃ ।

গজাসুরশিরশ্ছেত্তা গঙ্গোদ্ভাসিতমূর্ধজঃ ॥ ৬৪॥

কল্যাণাচলকোদণ্ডঃ কমলাপতিসাযকঃ ।

বারাংশেবধিতূণীরঃসরোজাসনসারথিঃ ॥ ৬৫॥

ত্রযীতুরঙ্গসংক্রান্তো বাসুকিজ্যাবিরাজিতঃ ।

রবীন্দুচরণাচারিধরারথবিরাজিতঃ ॥ ৬৬॥

ত্রয্যন্তপ্রগ্রহোদারচারুঘণ্টারবোজ্জ্বলঃ ।

উত্তানপর্বলোমাঢ্যো লীলাবিজিতমন্মথঃ ॥ ৬৭॥

জাতুপ্রপন্নজনতাজীবনোপাযনোৎসুকঃ ।

সংসারার্ণবনির্মগ্নসমুদ্ধরণপণ্ডিতঃ ॥ ৬৮॥

মদদ্বিরদধিক্কারিগতিমঞ্জুলবৈভবঃ ।

মত্তকোকিলমাধুর্যরসনির্ভরগীর্গণঃ ॥ ৬৯॥

কৈবল্যোদধিকল্লোললীলাতাণ্ডবপণ্ডিতঃ।

বিষ্ণুর্জিষ্ণুর্বাসুদেবঃ প্রভবিষ্ণুঃ পুরাতনঃ ॥ ৭০॥

বর্ধিষ্ণুর্বরদো বৈদ্যো হরির্নারায়ণোঽচ্যুতঃ।

অজ্ঞানবনদাবাগ্নিঃ প্রজ্ঞাপ্রাসাদভূপতিঃ ॥ ৭১॥

সর্পভূষিতসর্বাঙ্গঃ কর্পূরোজ্জ্বলিতাকৃতিঃ।

অনাদিমধ্যনিধনো গিরীশো গিরিজাপতিঃ ॥ ৭২॥

বীতরাগো বিনীতাত্মা তপস্বী ভূতভাবনঃ।

দেবাসুরগুরুধ্যেযো দেবাসুরনমস্কৃতঃ ॥ ৭৩॥

দেবাদিদেবো দেবর্ষির্দেবাসুরবরপ্রদঃ।

সর্বদেবমযোঽচিন্ত্যো দেবাত্মা চাত্মসংভবঃ ॥ ৭৪॥

নির্লেপো নিষ্প্রপঞ্চাত্মা নির্বিঘ্নো বিঘ্ননাশকঃ।

একজ্যোতির্নিরাতঙ্কো ব্যাপ্তমূর্তিরনাকুলঃ ॥ ৭৫॥

নিরবদ্যপদোপাধির্বিদ্যারাশিরনুত্তমঃ।

নিত্যানন্দঃ সুরাধ্যক্ষো নিঃসংকল্পো নিরঞ্জনঃ ॥ ৭৬॥

নিষ্কলঙ্কো নিরাকারো নিষ্প্রপঞ্চো নিরামযঃ।

বিদ্যাধরো বিযৎকেশো মার্কণ্ডেযবরপ্রদঃ ॥ ৭৭॥

ভৈরবো ভৈরবীনাথঃ কামদঃ কমলাসনঃ ।
বেদবেদ্যঃ সুরানন্দো লসজ্জ্যোতিঃ প্রভাকরঃ ॥ ৭৮॥

চূডামণিঃ সুরাধীশো যজ্ঞগেযো হরিপ্রিযঃ ।
নির্লেপো নীতিমান্ সূত্রী শ্রীহালাহলসুন্দরঃ ॥ ৭৯॥

ধর্মদক্ষো মহারাজঃকিরীটী বন্দিতো গুহঃ ।
মাধবো যামিনীনাথঃ শম্বরঃ শবরীপ্রিযঃ ॥ ৮০॥

সঙ্গীতবেত্তা লোকজ্ঞঃ শান্তঃ কলশসংভবঃ ।
ব্রহ্মণ্যো বরদো নিত্যঃ শূলী গুরুবরো হরঃ ॥ ৮১॥

মার্তাণ্ডঃ পুণ্ডরীকাক্ষো লোকনাযকবিক্রমঃ ।
মুকুন্দার্চ্যো বৈদ্যনাথঃ পুরন্দরবরপ্রদঃ ॥ ৮২॥

ভাষাবিহীনো ভাষাজ্ঞো বিঘ্নেশো বিঘ্ননাশনঃ ।
কিন্নরেশো বৃহদ্ভানুঃ শ্রীনিবাসঃ কপালভৃত্ ॥ ৮৩॥

বিজযো ভূতভাবজ্ঞো ভীমসেনো দিবাকরঃ ।
বিল্বপ্রিযো বসিষ্ঠেশঃ সর্বমার্গপ্রবর্তকঃ ॥ ৮৪॥

***Stotram Digitalized By Sanskritdocuments.org***

ওষধীশো বামদেবো গোবিন্দো নীললোহিতঃ ।
ষডর্ধনযনঃ শ্রীমন্মহাদেবো বৃষধ্বজঃ ॥ ৮৫॥

কর্পূরদীপিকালোলঃ কর্পূররসচর্চিতঃ ।
অব্যাজকরুণামূর্তিস্ত্যাগরাজঃ ক্ষপাকরঃ ॥ ৮৬॥

আশ্চর্যবিগ্রহঃ সূক্ষ্মঃ সিদ্ধেশঃ স্বর্ণভৈরবঃ ।
দেবরাজঃ কৃপাসিন্ধুরদ্বযোঽমিতবিক্রমঃ ॥ ৮৭॥

নির্ভেদো নিত্যসত্বস্থো নির্যোগক্ষেম আত্মবান্ ।
নিরপাযো নিরাসঙ্গো নিঃশব্দো নিরুপাধিকঃ ॥ ৮৮॥

ভবঃ সর্বেশ্বরঃ স্বামী ভবভীতিবিভঞ্জনঃ ।
দারিদ্র্যতৃণকূটাগ্নির্দারিতাসুরসন্ততিঃ ॥ ৮৯॥

মুক্তিদো মুদিতোঽকুব্জো ধার্মিকো ভক্তবৎসলঃ ।
অভ্যাসাতিশযজ্ঞেযশ্চন্দ্রমৌলিঃ কলাধরঃ ॥ ৯০॥

মহাবলো মহাবীর্যো বিভুঃ শ্রীশঃ শুভপ্রদঃ ।
সিদ্ধঃ পুরাণপুরুষো রণমণ্ডলভৈরবঃ ॥ ৯১॥

সদ্যোজাতো বটারণ্যবাসী পুরুষবল্লভঃ ।

হরিকেশো মহাত্রাতা নীলগ্রীবস্সুমঙ্গলঃ ॥ ৯২॥

হিরণ্যবাহুস্তীক্ষ্ণাংশুঃ কামেশঃ সোমবিগ্রহঃ ।
সর্বাত্মা সর্বকর্তা চ তাণ্ডবো মুণ্ডমালিকঃ ॥ ৯৩॥

অগ্রগণ্যঃ সুগম্ভীরো দেশিকো বৈদিকোত্তমঃ ।
প্রসন্নদেবো বাগীশশ্চিন্তাতিমিরভাস্করঃ ॥ ৯৪॥

গৌরীপতিস্তুঙ্গমৌলির্মখরাজো মহাকবিঃ ।
শ্রীধরস্সর্বসিদ্ধেশো বিশ্বনাথো দয়ানিধিঃ ॥ ৯৫॥

অন্তর্মুখো বহির্দৃষ্টিঃ সিদ্ধবেষমনোহরঃ ।
কৃত্তিবাসাঃ কৃপাসিন্ধুর্মন্ত্রসিদ্ধো মতিপ্রদঃ ॥ ৯৬॥

মহোৎকৃষ্টঃ পুণ্যকরো জগৎসাক্ষী সদাশিবঃ ।
মহাক্রতুর্মহাযজ্বা বিশ্বকর্মা তপোনিধিঃ ॥ ৯৭॥

ছন্দোময়ো মহাজ্ঞানী সর্বজ্ঞো দেববন্দিতঃ ।
সার্বভৌমস্সদানন্দঃ করুণামৃতবারিধিঃ ॥ ৯৮॥

কালকালঃ কলিধ্বংসী জরামরণনাশকঃ ।
শিতিকণ্ঠশ্চিদানন্দো যোগিনীগণসেবিতঃ ॥ ৯৯॥

চণ্ডীঈশঃ শুকসংবেদ্যঃ পুণ্যশ্লোকো দিবস্পতিঃ ।
স্থাযী সকলতত্ত্বাত্মা সদাসেবকবর্ধনঃ ॥ ১০০॥

রোহিতাশ্বঃ ক্ষমারূপী তপ্তচামীকরপ্রভঃ ।
ত্রিযংবকো বররুচির্দেবদেবশ্চতুর্ভুজঃ ॥ ১০১।

বিশ্বংভরো বিচিত্রাঙ্গো বিধাতা পুরশাসনঃ ।
সুব্রহ্মণ্যো জগৎস্বামী রোহিতাক্ষঃ শিবোত্তমঃ ॥ ১০২॥

নক্ষত্রমালাভরণো মঘবান্ অঘনাসনঃ ।
বিধিকর্তা বিধানজ্ঞঃ প্রধানপুরুষেশ্বরঃ ॥ ১০৩॥

চিন্তামণিঃ সুরগুরুর্ধ্যেযো নীরাজনপ্রিযঃ ।
গোবিন্দো রাজরাজেশো বহুপুষ্পার্চনপ্রিযঃ ॥ ১০৪॥।

সর্বানন্দো দযারূপী শৈলজাসুমনোহরঃ ।
সুবিক্রমঃ সর্বগতো হেতুসাধনবর্জিতঃ ॥ ১০৫॥

বৃষাঙ্কো রমণীযাঙ্গঃ সদঙ্ঘ্রিঃ সামপারগঃ ।
মন্ত্রাত্মা কোটিকন্দর্পসৌন্দর্যরসবারিধিঃ ॥ ১০৬ ॥

যজ্ঞেশো যজ্ঞপুরুষঃ সৃষ্টিস্থিত্যন্তকারণম্ ।

পরহংসৈকজিজ্ঞাস্যঃ স্বপ্রকাশস্বরূপবান্ ॥ ১০৭॥

মুনিমৃগ্যো দেবমৃগ্যো মৃগহস্তো মৃগেশ্বরঃ।
মৃগেন্দ্রচর্মবসনো নরসিংহনিপাতনঃ ॥ ১০৮॥

মুনিবন্দ্যো মুনিশ্রেষ্ঠো মুনিবৃন্দনিষেবিতঃ।
দুষ্টমৃত্যুরদুষ্টেহো মৃত্যুহা মৃত্যুপূজিতঃ ॥ ১০৯॥

অব্যক্তোঽম্বুজজন্মাদিকোটিকোটিসুপূজিতঃ।
লিঙ্গমূর্তিরলিঙ্গাত্মা লিঙ্গাত্মা লিঙ্গবিগ্রহঃ ॥ ১১০॥

যজুর্মূর্তিঃ সামমূর্তিরৃঙ্মূর্তির্মূর্তিবর্জিতঃ।
বিশ্বেশো গজচর্মৈকচেলাঞ্চিতকটীতটঃ ॥ ১১১॥

পাবনান্তেবসদ্যোগিজনসার্থসুধাকরঃ।
অনন্তসোমসূর্যাগ্নিমণ্ডলপ্রতিমপ্রভঃ ॥ ১১২॥

চিন্তাশোকপ্রশমনঃ সর্ববিদ্যাবিশারদঃ।
ভক্তবিজ্ঞাপ্তিসন্ধাতা কর্তা গিরিবরাকৃতিঃ ॥ ১১৩॥

জ্ঞানপ্রদো মনোবাসঃ ক্ষেম্যো মোহবিনাশনঃ।
সুরোত্তমশ্চিত্রভানুঃ সদাবৈভবতৎপরঃ ॥ ১১৪॥

সুহৃদগ্রেসরঃ সিদ্ধজ্ঞানমুদ্রো গণাধিপঃ ।
আগমশ্চর্মবসনো বাঞ্ছিতার্থফলপ্রদঃ ॥ ১১৫॥

অন্তর্হিতোঽসমানশ্চ দেবসিংহাসনাধিপঃ ।
বিবাদহন্তা সর্বাত্মা কালঃ কালবিবর্জিতঃ ॥ ১১৬॥

বিশ্বাতীতো বিশ্বকর্তা বিশ্বেশো বিশ্বকারণম্ ।
যোগিধ্যেযো যোগনিষ্ঠো যোগাত্মা যোগবিত্তমঃ ॥ ১১৭॥

ওংকাররূপো ভগবান্ বিন্দুনাদমযঃ শিবঃ ।
চতুর্মুখাদিসংস্তুত্যশ্চতুর্বর্গফলপ্রদঃ ॥ ১১৮॥

সহ্যাচলগুহাবাসী সাক্ষান্মোক্ষরসামৃতঃ ।
দক্ষাধ্বরসমুচ্ছেত্তা পক্ষপাতবিবর্জিতঃ ॥ ১১৯॥

ওংকারবাচকঃ শংভুঃ শংকরঃ শশিশীতলঃ ।
পঙ্কজাসনসংসেব্যঃ কিংকরামরবৎসলঃ ॥ ১২০॥

নতদৌর্ভাগ্যতূলাগ্নিঃ কৃতকৌতুকমঙ্গলঃ ।
ত্রিলোকমোহনঃ শ্রীমত্ত্রিপুণ্ড্রাঙ্কিতমস্তকঃ ॥ ১২১॥

ক্রৌঞ্চারিজনকঃ শ্রীমদ্গণনাথসুতান্বিতঃ ।

অদ্ভুতানন্তবরদোঽপরিচ্ছিনাত্মবৈভবঃ ॥ ১২২॥

ইষ্টাপূর্তপ্রিযঃ শর্ব একবীরঃ প্রিযংবদঃ ।

ঊহাপোহবিনির্মুক্ত ওংকারেশ্বরপূজিতঃ ॥ ১২৩॥

রুদ্রাক্ষবক্ষা রুদ্রাক্ষরূপো রুদ্রাক্ষপক্ষকঃ ।

ভুজগেন্দ্রলসৎকণ্ঠো ভুজঙ্গাভরণপ্রিযঃ ॥ ১২৪॥

কল্যাণরূপঃ কল্যাণঃ কল্যাণগুণসংশ্রযঃ ।

সুন্দরভ্রূঃ সুনযনঃ সুললাটঃ সুকন্ধরঃ ॥ ১২৫॥

বিদ্বজ্জনাশ্রযো বিদ্বজ্জনস্তব্যপরাক্রমঃ ।

বিনীতবৎসলো নীতিস্বরূপো নীতিসংশ্রযঃ ॥ ১২৬॥

অতিরাগী বীতরাগী রাগহেতুর্বিরাগবিত্ ।

রাগহা রাগশমনো রাগদো রাগিরাগবিত্ ॥ ১২৭॥

মনোন্মনো মনোরূপো বলপ্রমথনো বলঃ ।

বিদ্যাকরো মহাবিদ্যো বিদ্যাবিদ্যাবিশারদঃ ॥ ১২৮॥

বসন্তকৃদ্বসন্তাত্মা বসন্তেশো বসন্তদঃ ।

প্রাবৃটকৃত্ প্রাবৃডাকারঃ প্রাবৃটকালপ্রবর্তকঃ ॥ ১২৯॥

শরন্নাথো শরৎকালনাশকঃ শরদাশ্রয়ঃ ।
কুন্দমন্দারপুষ্পৌঘলসদ্বায়ুনিষেবিতঃ ॥ ১৩০॥

দিব্যদেহপ্রভাকূটসংদীপিতদিগন্তরঃ ।
দেবাসুরগুরুস্তব্যো দেবাসুরনমস্কৃতঃ ॥ ১৩১॥

বামাঙ্গভাগবিলসচ্ছ্যামলাবীক্ষণপ্রিয়ঃ ।
কীর্ত্যাধারঃ কীর্তিকরঃ কীর্তিহেতুরহেতুকঃ ॥ ১৩২॥

শরণাগতদীনার্তপরিত্রাণপরায়ণঃ ।
মহাপ্রেতাসনাসীনো জিতসর্বপিতামহঃ ॥ ১৩৩॥

মুক্তাদামপরীতাঙ্গো নানাগানবিশারদঃ ।
বিষ্ণুব্রহ্মাদিবন্দ্যাঙ্ঘ্রির্নানাদেশৈকনায়কঃ ॥ ১৩৪॥

ধীরোদাত্তো মহাধীরো ধৈর্যদো ধৈর্যবর্ধকঃ ।
বিজ্ঞানময় আনন্দময়ঃ প্রাণময়োঽন্নদঃ ॥ ১৩৫॥

ভবাব্ধিতরণোপায়ঃ কবির্দুঃস্বপ্ননাশনঃ ।
গৌরীবিলাসসদনঃ পিশচানুচরাবৃতঃ ॥ ১৩৬॥

দক্ষিণাপ্রেমসংতুষ্টো দারিদ্র্যবডবানলঃ ।

অদ্ভুতানন্তসংগ্রামো ডক্কাবাদনতৎপরঃ ॥ ১৩৭॥

প্রাচ্যাত্মা দক্ষিণাকারঃ প্রতীচ্যাত্মোত্তরাকৃতিঃ ।
ঊর্ধ্বাদ্যন্যদিগাকারো মর্মজ্ঞঃ সর্বশিক্ষকঃ ॥ ১৩৮॥

যুগাবহো যুগাধীশো যুগাত্মা যুগনাযকঃ ।
জঙ্গমঃ স্থাবরাকারঃ কৈলাসশিখরপ্রিযঃ ॥ ১৩৯॥

হস্তরাজৎপুণ্ডরীকঃ পুণ্ডরীকনিভেক্ষণঃ ।
লীলাবিডংবিতবপুর্ভক্তমানসমণ্ডিতঃ ॥ ১৪০॥

বৃন্দারকপ্রিযতমো বৃন্দারকবরার্চিতঃ ।
নানাবিধানেকরত্নলসৎকুণ্ডলমণ্ডিতঃ ॥ ১৪১॥

নিঃসীমমহিমা নিত্যলীলাবিগ্রহরূপধৃত্ ।
চন্দনদ্রবদিগ্ধাঙ্গশ্চাম্পেযকুসুমার্চিতঃ ॥ ১৪২॥

সমস্তভক্তসুখদঃ পরমাণুর্মহাহ্রদঃ ।
অলৌকিকো দুষ্প্রধর্ষঃ কপিলঃ কালকন্ধরঃ ॥ ১৪৩॥

কর্পূরগৌরঃ কুশলঃ সত্যসন্ধো জিতেন্দ্রিযঃ ।
শাশ্বতৈশ্বর্যবিভবঃ পোষকঃ সুসমাহিতঃ ॥ ১৪৪॥

মহর্ষিনাথিতো ব্রহ্মযোনিঃ সর্বোত্তমোত্তমঃ ।

ভূতিভারার্তিসংহর্তা ষড়ূর্মিরহিতো মৃডঃ ॥ ১৪৫॥

ত্রিবিষ্টপেশ্বরঃ সর্বহৃদযাম্বুজমধ্যগঃ ।

সহস্রদলপদ্মস্থঃ সর্ববর্ণোপশোভিতঃ ॥ ১৪৬॥

পুণ্যমূর্তিঃ পুণ্যলভ্যঃ পুণ্যশ্রবণকীর্তনঃ ।

সূর্যমণ্ডলমধ্যস্থশ্চন্দ্রমণ্ডলমধ্যগঃ ॥ ১৪৭॥

সদ্ভক্তধ্যাননিগলঃ শরণাগতপালকঃ ।

শ্বেতাতপত্ররুচিরঃ শ্বেতচামরবীজিতঃ ॥ ১৪৮॥

সর্বাবযবসংপূর্ণঃ সর্বলক্ষণলক্ষিতঃ ।

সর্বমঙ্গলমাঙ্গল্যঃ সর্বকারণকারণঃ ॥ ১৪৯॥

অমোদো মোদজনকঃ সর্পরাজোত্তরীযকঃ ।

কপালী কোবিদঃ সিদ্ধকান্তিসংবলিতাননঃ ॥ ১৫০॥

সর্বসদ্গুরুসংসেব্যো দিব্যচন্দনচর্চিতঃ ।

বিলাসিনীকৃতোল্লাস ইচ্ছাশক্তিনিষেবিতঃ ॥ ১৫১॥

অনন্তানন্দসুখদো নন্দনঃ শ্রীনিকেতনঃ ।

অমৃতাব্ধিকৃতাবাসো নিত্যক্লীবো নিরামযঃ ॥ ১৫২॥

অনপাযোঽনন্তদৃষ্টিরপ্রমেযোঽজরোঽমরঃ ।
তমোমোহপ্রতিহতিরপ্রতর্ক্যোঽমৃতোঽক্ষরঃ ॥ ১৫৩॥

অমোঘবুদ্ধিরাধার আধারাধেযবর্জিতঃ ।
ঈষণাত্রযনির্মুক্ত ইহামুত্রবিবর্জিতঃ ॥ ১৫৪॥

ঋগ্যজুঃসামনযনো বুদ্ধিসিদ্ধিসমৃদ্ধিদঃ ।
ঔদার্যনিধিরাপূর্ণ ঐহিকামুষ্মিকপ্রদঃ ॥ ১৫৫॥

শুদ্ধসন্মাত্রসংবিদ্ধী-স্বরূপসুখবিগ্রহঃ ।
দর্শনপ্রথমাভাসো দৃষ্টিদৃশ্যবিবর্জিতঃ ॥ ১৫৬॥

অগ্রগণ্যোঽচিন্ত্যরূপঃ কলিকল্মষনাশনঃ ।
বিমর্শরূপো বিমলো নিত্যরূপো নিরাশ্রযঃ ॥ ১৫৭॥

নিত্যশুদ্ধো নিত্যবুদ্ধঃ নিত্যমুক্তোঽপরাকৃতঃ ।
মৈত্র্যাদিবাসনালভ্যো মহাপ্রলযস